श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथपादुकासहस्रम् ॥

## ॥ समाख्यापद्धतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ समाख्यापद्धतिः ॥

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे विष्णुपदासक्तं तमृषिं तां च पादुकाम्।
याथार्थ्या शठजित्संज्ञा मच्चित्तविजयात् ययोः॥ १ ॥

द्रमिडोपनिषन्निवेशशून्यान्
अपि लक्ष्मीरमणाय रोचयिष्यन्।
ध्रुवमाविशति स्म पादुकात्मा
शठकोपः स्वयमेव माननीयः॥ २ ॥

नियतं मणिपादुके! दधानः
स मुनिस्ते शठकोप इत्यभिख्याम्।
त्वदुपाश्रितपादजातवंश-
प्रतिपत्त्यै परमाततान् रूपम्॥ ३ ॥

मुनिना मणिपादुके! त्वया च
प्रथिताभ्यां शठकोपसंज्ञयैव।
द्वितयं सकलोपजीव्यमासीत्
प्रथमेन श्रुतिरन्यतस्तदर्थः॥ ४ ॥

आकर्ण्य कर्णामृतमात्मवन्तो
गाथासहस्रं शठकोपसूरेः।
मञ्जुप्राणादां मणिपादुके! त्वाम्
तदेकानामानमनुस्मरन्ति॥ ५ ॥

यः सप्तपर्वव्यवधानतुङ्गां
शेषत्वकाष्ठामभजन्मुरातेः।

तस्यापि नामोद्वहनात् त्वयाऽसौ
लघूकृतोऽभूच्छठकोपसूरिः॥ ६ ॥

शय्यात्मना मधुरिपोरसि शेषभूता
पादाश्रयेण च पुरर्द्विगुणीकृतं तत्।
भूरोऽपि भागवतशेषतया तदेव
व्यङ्क्तुं पदावनि ! शठारिपदं बिभर्षि॥ ७ ॥

पद्येन देवि ! शठकोपमुनिस्तवासीत्
तस्यापि नामवहनान्मणिपादुके ! त्वम्।
शेषी बभूव युवयोरपि शेषशायी
शेषं त्वशेषमपि शेषपदे स्थितं वः॥ ८ ॥

विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः
कुम्भीसूनोरसुरकबलग्रासिनः स्वैरभाषा।
नित्यं जाता शठरिपुतनोर्निष्पतन्ती मुखात् ते
प्राचीनानां श्रुतिपरिषदां पादुके ! पूर्वगण्या॥ ९ ॥

शठकोप इति समाख्या तव रङ्गधुरीणपादुके ! युक्त्या।
सूते सहस्रमेवं सूक्तीः स्वयमेव यन्मया भवती॥ १० ॥

॥ इति पादुकासहस्रे समाख्यापद्धतिः द्वितीया ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥